# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

**कक्षा - शास्त्री-३, सेमेस्टर-५** **प्रश्नपत्रम् - ५** **गुणाः - ७०**

**विषयः - धर्मशास्त्रम्** **कोड - CC-3.5.9** **समयः - ११-०२**

**दिनाङ्कः - २९.११.२०१६** **ग्रन्थः - याज्ञवल्क्यस्मृतिः प्रायश्चित्ताध्यायः**

---

### प्रथमान्वितिः ( युनिट - १ )

**प्रश्नः १ द्वयोः श्लोकयोः ससन्दर्भपुरस्सरं व्याख्या कार्या ।** ०८

*(१)* *मानुष्ये कदलीस्तम्भ निःसारे सारमार्गणम् ।*
*करोति यः स संमूढो जलबुद्बुदसंनिभे ॥*

*(२)* *आचार्यपित्रुपाध्यायान्निर्हृत्यपि व्रती व्रती ।*
*सकटान्नं च नाश्नीयान्न च तैः सह संवसेत् ॥*

*(३)* *लाक्षालवणमांसानि पतनीयानि विक्रये ।*
*पयो दधि च मद्यं च हीनवर्णकराणि तु ॥*

**प्रश्नः २** *१. ग्रन्थानुसारेण आशौचप्रकरणस्य सारांशं लेख्यः ।* ०८

*अथवा*

*२. यजुः शिष्यपरम्परायां याज्ञवल्क्यस्य स्थानं विवेचयत ।*

**प्रश्नः ३ द्वयोः शब्दयोः टिप्पणी कार्या ।** ०४

*(१) प्रायश्चित्तम् ।* *(२) वैतानाः ।*
*(३) आपद्धर्मः ।* *(४) ज्वलनार्कसमः ।*

**प्रश्नः ४ अधस्तनेषु पञ्चानामुत्तरं देयम् ।** ०५

*(१)* *आशौचशब्दस्य कोऽर्थः ?*
*(२)* *ऊनद्विवार्षिकं प्रेतं कुत्र निदध्यात् ?*
*(३)* *ब्रह्मचारी सपिण्डे उदकादिदानं कुर्यान्न वा ?*
*(४)* *संसारसारे कीदृशो जनः मूर्खः ?*
*(५)* *फेनप्रख्यः शब्दस्य कोऽर्थः ?*
*(६)* *त्रिरात्रं बुभुक्षितो ब्राह्मणः किं कुर्यात् ?*
*(७)* *प्रायश्चित्ताध्याये कति प्रकरणानि ?*

### द्वितीयान्वितिः ( युनिट - २ )

**प्रश्नः ५ ससन्दर्भौ द्वौ श्लोकौ व्याख्येयौ ।** ०८

*(१)* *दन्तोलूखलिकः कालपक्वाशी वाश्मकुट्टकः ।*
*श्रौत्रं स्मार्तं फलस्नेहैः कर्म कुर्यात्तथा क्रिया ॥*

*(२)* *ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः ।*
*आर्द्रं वासास्तु हेमन्ते शक्त्या वापि तपश्चरेत् ॥*

(३) *सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ।*
*एकरामः परिव्रज्य भिक्षार्थी ग्राममाश्रयेत् ॥*

**प्रश्नः ६** *१. चतुर्णामाश्रमाणां नामानि लिखित्वा, वानप्रस्थाश्रमस्य भोज्याभोज्यपदार्थाः विवेचनीयाः ।* **०८**

*अथवा*

*२. यतिपात्राणां नामानि लिखित्वा कायस्वरूपं वर्णयत ।*

**प्रश्नः ७** **अन्यतरयोरेकस्य टिप्पणी विधेया ।** **०२**
*(१) संयुक्तशुक्रशोणितस्य कार्यरूपपरिणतक्रमः ।*
*(२) शारीर-रसादि परिमाणम् ।*

**प्रश्नः ८** **अधस्तनेषु द्वौ प्रश्नौ समाधेयौ ।** **०२**
*(१) अस्तेयशब्दस्य कोऽर्थः ?*
*(२) आत्मा शरीरं कथं गृह्णाति ?*
*(३) षष्ठात्मा कदा साङ्गैरिन्द्रियैश्च संयुक्तो भवति ?*
*(४) शिरसः कति कपालानि भवन्ति ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९** **द्वयोः श्लोकयोः ससन्दर्भपुरस्सरं संस्कृते व्याख्या कार्या ।** **०८**
(१) *प्रदर्शनार्थमेतत्तु मयोक्तं स्तेयकर्मणि ।*
*द्रव्यप्रकारा हि यथा तथैव प्राणिजातयः ॥*
(२) *सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च ।*
*सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम् ॥*
(३) *अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव च ।*
*पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥*

**प्रश्नः १०** *प्रायश्चित्ताकरणे दोषपुरस्सरं नरकस्वरूपं विवृणुत ।* **०८**

*अथवा*

*गुरुतल्पगप्रसङ्गे सकामायाः स्त्रियः कीदृशम् प्रायश्चित्तम् स्व-मत्या लिखत ।*

**प्रश्नः ११** **टिप्पणी विधेया ।( द्वयोः )** **०४**
*(१) कर्मविपाकः ।* *(२) गुरुतल्पगः ।*
*(३) ब्रह्महत्याप्रायश्चित्तम् ।* *(४) धर्मशास्त्रम् ।*

**प्रश्नः १२** **अधस्तनेषु पञ्चैव प्रश्नाः समाधेयाः ।** **०५**
*(१) अस्मिन् धर्मशास्त्रे कति नरकाणि प्रोक्तानि ?*
*(२) अज्ञाते मद्यपाने किं प्रायश्चित्तम् ?*
*(३) द्विजातीभार्या सुरां पिबति चेत् सा पतिलोकं याति न वा ?*
*(४) मधुमांसभक्षणे ब्रह्मचारी कीदृशं व्रतमाचरेत् ?*
*(५) रजस्वलागामी कथं शुद्ध्यति ?*
*(६) याज्ञवल्क्यस्मृतेः कर्ता कः ?*
*(७) ऋषिवैशम्पायनस्य कति शिष्या आसन् ?*

=०=